# rudrAbhiShekastotram from Mahabharata

# રુદ્રાભિષેકસ્તોત્રમ્ મહાભારતાન્તર્ગતમ્

## Document Information


Text title : rudrAbhiShekastotra mahAbharatAntargataM

File name : rudrAbhiShekastotra.itx

Category : shiva, stotra

Location : doc_shiva

Proofread by : Sunder Hattangadi

Latest update : March 10, 2013

Send corrections to : Sanskrit@cheerful.com



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.



October 3, 2021

*sanskritdocuments.org*

# રુદ્રાભિષેકસ્તોત્રમ્ મહાભારતાન્તર્ગતમ્

કૃષ્ણાર્જુનાવૂચતુઃ ।
નમો ભવાય શર્વાય રુદ્રાય વરદાય ચ ।
પશૂનાં પતયે નિત્યમુગ્રાય ચ કપર્દિને ॥ ૫.૮૦.૫૫॥

મહાદેવાય ભીમાય ત્ર્યમ્બકાય ચ શાન્તયે ।
ઈશાનાય મખઘ્નાય નમોઽસ્ત્વન્ધકઘાતિને ॥ ૫.૮૦.૫૬॥

કુમારગુરવે તુભ્યં નીલગ્રીવાય વેધસે ।
પિનાકિને હવિષ્યાય સત્યાય વિભવે સદા ॥ ૫.૮૦.૫૭॥

વિલોહિતાય ધૂમ્રાય વ્યાધાયાનપરાજિતે ।
નિત્યં નીલશિખણ્ડાય શૂલિને દિવ્યચક્ષુષે ॥ ૫.૮૦.૫૮॥

હોત્રે પોત્રે ત્રિનેત્રાય વ્યાધાય વસુરેતસે ।
અચિન્ત્યાયામ્બિકાભર્ત્રે સર્વદેવસ્તુતાય ચ ॥ ૫.૮૦.૫૯॥

વૃષધ્વજાય મુણ્ડાય જટિને બ્રહ્મચારિણે ।
તપ્યમાનાય સલિલે બ્રહ્મણ્યાયાજિતાય ચ ॥ ૫.૮૦.૬૦॥

વિશ્વાત્મને વિશ્વસૃજે વિશ્વમાવૃત્ય તિષ્ઠતે ।
નમોનમસ્તે સેવ્યાય ભૂતાનાં પ્રભવે સદા ॥ ૫.૮૦.૬૧॥

બ્રહ્મવક્ત્રાય સર્વાય શંકરાય શિવાય ચ ।
નમોઽસ્તુ વાચસ્પતયે પ્રજાનાં પતયે નમઃ ॥ ૫.૮૦.૬૨॥

અભિગમ્યાય કામ્યાય સ્તુત્યાયાર્યાય સર્વદા ।
નમોઽસ્તુ દેવદેવાય મહાભૂતધરાય ચ ।
નમો વિશ્વસ્ય પતયે પત્તીનાં પતયે નમઃ ॥ ૫.૮૦.૬૩॥

નમો વિશ્વસ્ય પતયે મહતાં પતયે નમઃ ।
નમઃ સહસ્રશિરસે સહસ્રભુજમૃત્યવે ॥

સહસ્રનેત્રપાદાય નમોઽસઙ્ખ્યેયકર્મણે । ૫.૮૦.૬૪॥

નમો હિરણ્યવર્ણાય હિરણ્યકવચાય ચ ।
ભક્તાનુકમ્પિને નિત્યં સિધ્યતાં નો વરઃ પ્રભો ॥ ૫.૮૦.૬૫॥

સઞ્જય ઉવાચ ।
એવં સ્તુત્વા મહાદેવં વાસુદેવઃ સહાર્જુનઃ ।
પ્રસાદયામાસ ભવં તદા હ્યસ્ત્રોપલબ્ધયે ॥ ૫.૮૦.૬૬॥

॥ ઇતિ શ્રીમન્મહાભારતે દ્રોણપર્વણિ પ્રતિજ્ઞાપર્વણિ
અર્જુનસ્વપ્ને અશીતિતમોઽધ્યાયઃ ॥ ૮૦॥

Similar stotra is also found in matsyapurANa adhyAya 132
See sa.wikisource.org
The Kinjavadekar's Mahabharata edition does not include 80.63.
Proofread by Sunder Hattangadi

*rudrAbhiShekastotram from Mahabharata*

pdf was typeset on October 3, 2021

Please send corrections to *sanskrit@cheerful.com*